ISSN 2454-8596
www.vidhyayanaejournal.org
VIDHYAYANA
An International Multidisciplinary Research e-Journal

# विषयः विभिन्नपुराणस्थस्य आदित्यगणस्याध्ययनम्

**Kaushik Rajyaguru**
Research Scholar
Dept. of Sanskrit
Saurashtra University, Rajkot

ISSN 2454-8596
www.vidhyayanaejournal.org
VIDHYAYANA
An International Multidisciplinary Research e-Journal

ऋग्वेदस्यानेकाः उत्कृष्टदेवताः आदित्यगणे परिगणिताः । पौराणिककाले अदितेः द्वादशपुत्राणां उल्लेखः प्राप्तः । अदितिपुत्रत्वात् **'आदित्यः'** प्रथितः ।[1] यद्यप्येतेषु नामेषु पूर्णतः एकरूपता न प्राप्यते किन्तु श्रीमद्भागवतमहापुराणे ६/६/२९ प्राप्ता सूची एव यत्किञ्चिदन्तरेण सर्वत्र प्राप्यते । यथा –

**विवस्वानर्यमा पूषा त्वष्टाथ सविता भगः ।**
**धाता विधाता वरुणो मित्रः शक्र उरुक्रमः ।।**

विधातुः स्थाने विष्णुपुराणे 'अंशुः' इति नाम परिगणितम् ।[2] यच्च ऋग्वेदे परिगणितस्यांशस्यैव प्रतिरूपं प्रतीयते ।

मत्स्यपुराणे[3] अंशोः स्थाने **'अंशुमान्'** शब्दः प्रयुक्तः यः पूर्णतः सूर्यस्य पर्यायवाची शब्दः । अस्मिन्नेव पुराणे एकस्मिन् स्थाने (१७०/५७) अस्यां सूचौ न त्वंशुमतः न तु सवितुः उल्लेखो प्राप्यते । तत्स्थाने धनव–पर्जन्ययोः गणना जाता ।[4]

वायुपुराणे (६६/७३) विधातुः स्थाने अंशस्य सवितुः स्थाने पर्जन्यस्य च गणना भवति ।

---

1 **दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः** ।। (अष्टाध्यायी – ४/१/८५) इत्यनेन सूत्रेण अदितिशब्दतः अपत्यार्थकः 'ण्यः' प्रत्ययः ।।

2 मारीचात् कश्यपाज्जाता आदित्या दक्षकन्यका ।
तत्र विष्णुश्च शक्रश्च जज्ञाते पुनरेव हि ।।
अर्यमा चैव धाता च त्वष्टा पूषा तथैव च ।
विवस्वान् सविता चैव मित्रो वरुण एव च ।।
अंशुर्भगश्चातितेजा आदित्या द्वादश स्मृताः ।। विष्णुपुराणम्–१/१५/१३१–१३३

3 इन्द्रो धाता भगस्त्वष्ट्रा मित्रोऽथ वरुणो यमः ।
विवस्वान् सविता पूषा अंशुमान् विष्णुरेव च ।
मारीचात् काश्यपादाप पुत्रानदितिरुत्तमान् ।। मत्स्यपुराणम् – ६/४,५

4 इन्द्रो विष्णुर्भगस्त्वष्टा वरुणो ह्यर्यमा रविः ।
पूषा मित्रश्च धनदो धाता पर्जन्य एव च ।
इत्येते द्वादशादित्याः ..... ।। मत्स्यपुराणम् – १७०/५६,५७

अंशो: स्थाने 'अंशस्य' गणनाया अतिरिक्तं प्राय: महाभारत- (आदिपर्व-६६/३६-३७) विष्णुपुराणयो: सूचौ समानता दरीदृश्यते ।[5] किन्तु परवर्तिमहाभारते (अनुशासनपर्व-१५०/१५) हरिवंशपुराणे च जयन्तस्यापि आदित्यरूपेण स्वीकारो जात: । सामान्यतस्तु इमं इन्द्रपुत्ररूपेण अवगच्छाम: । किन्तु: जयन्तस्तु किञ्चित् प्राचीन: इत्यपि प्रतीयते । कारणं यत्, ब्राह्मणग्रन्थेषु अपि सवितु: विधातु: वा स्थाने स्वतन्त्ररूपेणास्य गणना जाता ।

★ **आदित्यशब्दस्य व्युत्पत्ति:**

ऐतरेयब्राह्मणे दिवधातुत: आदित्यशब्दस्य व्युत्पत्ति: दर्शिता । व्याकरणदृष्ट्या अशुद्धत्वेऽपीयं व्युत्पत्ति: संभवत: आदित्यानां मूलस्वरूपत: सर्वाधि: समीपा । कारणं यत् प्राय: निश्चितं यत् आदित्यगणे परिगणिता: देवता: स्वकीयमूलरूपे केनापि प्रकारेण प्रकाशेन सम्बन्धिता: । महाभारतकालेऽपि आदित्यानामिदं स्वरूपमत्यन्तं स्पष्टमासीत् । आदिपर्वणि ९५/१४-१५ कथितं यत् अदितिगर्भत: समुत्पन्ना: द्वादशादित्या: सूर्यस्यैव विभिन्नरूपा: ।

**द्वादशैते समाख्याता आदित्या: सूर्यरूपिण: ।**
**अदितेर्गर्भसम्भूता: सर्वदेवपुरोगमा: ।।**

किन्तु ब्राह्मणग्रन्थेषु आदित्यशब्दस्यान्यप्रकारेणापि व्याख्या दृश्यते । यथा शतपथब्राह्मणे ११/६/६/८ (बृहदारण्यकोपनिषदि ३/९/५) कथितं यत् वर्षस्य द्वादशमासा एव द्वादशादित्या: ।[6]

शब्दान्तरेण श्रीमद्भागवतस्यापि कथनमस्ति वेदरूप-आदिपुरुष-भगवान्सूर्य: लौकिकं कर्म सञ्चालनाय स्वं द्वादशभागेषु विभज्य वसंतादि षड्-ऋतुषु तदनुरूप- ऋतुगणानां विधानं वर्तते ।[7]

---

5 अदित्यां द्वादशादित्या सम्भूता भुवनेश्वरा: ।
धाता मित्रोऽर्यमा शक्रो वरुणस्त्वंश एव च ।।
भगो विवस्वान् पूषा च सविता दशमस्तथा ।
एकादशस्तथा त्वष्टा द्वादशो विष्णुरुच्यते ।।

6 कतमे आदित्या इति । द्वादशमासा: संवत्सरस्य एते आदित्या: । एते हि इदं सर्वम् आददना यान्ति । यद् इदं सर्वम् आददाना यन्ति तस्माद् आदित्या इति ।

7 स एष भगवानादिपुरुष: …….. लोकानां स्वस्तये आत्मानं त्रयीमयं कर्मशुद्धिनिमित्तं द्वादशया विभज्य षट्सु ऋतुषु यथोपजीवम् ऋतुगणान् विदधाति । भागवतपुराणम् – ५/२२/३

परवर्तिहिन्दुधर्मे प्रलयकालावसरे प्रकाशितद्वादशादित्यानां कल्पना एतेषामेवादित्यानां विकसितरूपम् । विष्णुपुराणे (२/१०/२) कथितं यत् द्वादशमासेषु सूर्यस्य रथः विभिन्नादित्यैरधिष्ठितः भवति ।[8]

★ **सूर्यवाचकशब्दानाम् अर्थः**

- **अर्यमा**शब्दस्यार्थः भवति सुहृद् वरस्य परिचितो वा । एवं वैवाहिकसम्बन्धस्य पवित्रतायाः द्योतकः ।
- **मित्र**शब्दस्यार्थः भवति मैत्री/मित्रता । वरुणस्य सामाजिकरूपं व्यक्तं करोति ।
- **भग**शब्दस्यार्थः भवति भाग्यं सम्पत्तिर्वा । एवमयं शब्दः वरुणस्य सौभाग्यप्रदायिन्याः प्रकृतेः उदारतायाश्च बोधं कारयति ।
- **दक्ष**शब्दस्यार्थः भवति निपुणता कौशलं वा । एवमयं शब्दः वरुणस्य शक्तेः चातुर्यस्य वा परिचायकः ।
- **अंश**शब्दस्यार्थः भवति भागः । एवमनेन प्रतीयते यत् वरुणः कमपि व्यक्तिं स्वप्राप्तांशात् विमुखं न करोति ।

सवितृ–विवस्वदित्यादिनी नामानि तु केवलं सूर्यस्य पर्यायवाचिपदानि ।

इत्थं सामूहिकरूपेण आदित्यगणः दिव्यज्योतितः सम्बन्धितत्वेऽपि सत्यस्य पवित्रतायाः ऋतस्य च रक्षकः । तथा नैतिक–शाश्वत–अभंग्य–सांसारिकनियमानामपि संस्थापकः ।

**सन्दर्भग्रन्थसूचिः**

महर्षिवेदव्यासप्रणीत– श्रीमद्भागवतमहापुराणम् – द्वितीयखण्डः– तेईसवाँ संस्करण, प्रकाशक – गोविन्दभवन कार्यालय, गीताप्रेस गोरखपुर

महर्षिवेदव्यासप्रणीत– श्रीविष्णुपुराण – अनुवादक – श्रीमुनीलाल गुप्त, संस्करण – २०६९ चौवालिसवाँ संस्करण, प्रकाशक – गोविन्दभवन कार्यालय, गीताप्रेस गोरखपुर

महर्षिवेदव्यासप्रणीत– अग्निपुराण – अनुवादक – तारिणीशजा, डॉ.घनश्याम त्रिपाठी, हिन्दी साहित्य सम्मेलन, प्रयाग, इलाहाबाद, संस्करण – तृतीय

8 स रथोऽधिष्ठितो देवैरादित्यैर्ऋषिभिस्तथा ।। २/१०/२